CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 115.

Title MAIDHARI SAMAKHYA TRTIYA VRTTI. (KRDANTA.)

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 115 Subject : Grammar.

Title : Maidhari Samāsakhyā

Author : Anubhūtisvarūpa ~~Scribe~~ : ācārya

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 9.1" x 4.1" Extent : 35 foll.

Language : Sanskrit. Script : Devanāgarī.

Remarks : Complete.

॥ श्रीगणेशाय नमः ॥ ॐ निजजनैर्विधिना निखिलापदोऽटितियो विनिवर्त्त्य

तिस्म ततः ॥ जयधिजापरिरंभणलालसो नरहरिः कुरुतां जगतां शिवं ॥१॥ अ

थ तृदंतप्रक्रिया निरूप्यते ॥ तृ कर्त्तरि ॥ वाच्यमानः प्रत्ययः तृसंज्ञः स च कर्त्तरि

भवति ॥ चकाराद्भावकर्मणोरपि ॥ स्वतंत्रः कर्त्ता ॥ क्रियायां स्वातंत्र्येण विवक्ष्यतोऽर्थः

कर्त्ता स्यात् ॥ शुद्धो धात्वर्थो भाव इत्यभिधीयते ॥ कर्त्तुरीप्सिततमं कर्म ॥ कर्त्तुः क्रि

तृ यया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् ॥ ईप्सितवत् ॥ अनीप्सितमपि ॥ विशेष्य

क्ते देवदत्तः ॥ ण्वुलृचौ ॥ धातोस्तृण्वुलौ प्रत्ययौ भवतः ॥ डुपचष पाके ॥ पक्तृ इति स्थिते ॥

तृत्प्रितसमासेषु नाम्नां वर्त्तनामता स्यात् इः ॥ ऋतुराट् ॥ सेरा ॥ स च डित् ॥ पक्ता । पक्ता १

रौ । पक्तारः ॥ स्त्रियां ई ॥ न्नरण इप् ॥ पक्त्री ॥ नपुंसके पक्तृ ॥ इत्यादि । डुकृञ् करणे ॥

करोतीति कर्त्ता । हृञ् हरणे ॥ हरतीति हर्त्ता ॥ तृतः । धातोः परस्य तृप्रत्ययस्य वसादे

रिडागमो भवति ॥ भू सत्तायां ॥ भवतीति भविता ॥ एध वृद्धौ ॥ एधते सौ एधिता ॥ षुङ् प्रा

णिप्रसवे ॥ सूयते सौ सविता ॥ गुपू रक्षणे ॥ गोपायतीति गोपायिता ॥ ऊदितो वा ॥ गो

पिता गोप्ता ॥ षिधु शास्त्रे माङ्गल्ये च ॥ सेधतीति सेधिता ॥ सेद्धा ॥ इषु इच्छायां ॥ इषु

सहलुभरिषरुषामन्तपितस्येषात्कव्यः ॥ इच्छतीति एषिता एष्टा ॥ लुभ विमोहने ॥ उ

पधायाः लघोः ॥ लुभ्यतीति लोभिता ॥ ऊवेन्द्रवाः ॥ तथोर्धः ॥ लोब्धा ॥ रिष वधे ॥ रिष्य

तीति रेषिता ॥ रेष्टा ॥ रुष क्रोधे ॥ रोषतीति रोषिता ॥ रोष्टा ॥ शास अनुशिष्टौ ॥ शास

अनुशिष्टौ ॥ शास्तीति शासिता ॥ शास्ता ॥ षह मर्षणे ॥ सहतेऽसौ सहिता ॥ सहिवहोरो
दवर्णस्य ॥ हो ढः ॥ तथोर्धः ॥ ष्टुत्वं ॥ ढलोपः ॥ सोढा ॥ वह प्रापणे ॥ वहतीति वोढा ॥ युवोर
नाकौ ॥ युवु इत्येतयोरन अक इत्येतावादेशौ भवतः ॥ यथासंख्येन ॥ ववयोरैक्यं ॥
णित्वाद्वृद्धिः ॥ पचतीति पाचकः ॥ पवतीति पावकः ॥ लुनाति ति लावयतीति लावकः ॥
भवति भावयतीति भावकः ॥ आतो युक् ॥ ददाति दापयति वा दायकः ॥ हनो घत् ॥ ह
न हिंसागत्योः ॥ हन्ति घातयति वा घातकः ॥ जनी प्रादुर्भावे ॥ जायतेऽसौ जनकः ॥ जनि
वध्योर्न वृद्धिः ॥ वध हिंसायां ॥ वधतीति वधकः ॥ घटतेऽसौ घटकः ॥ दरिद्रा दुर्गतौ
ण्वुल्ल्युटोऽहित्वाद्दरिद्रातेरनप्यालोपो वा ॥ नुडिना ॥ दरतीति दरिद्रिता २

श्री

दरिद्रायकः ॥ पूञ् पवने ॥ पुनातीति पावकः ॥ नाम्युपधात्कः ॥ नाम्युपधाद्धातोः कः
प्रत्ययो भवति ककारो गुणाभावार्थः ॥ क्षिप प्रेरणे ॥ क्षिपतीति क्षिपः ॥ भिदिर् विदा
रणे ॥ भिनत्तीति भिदः ॥ तुद व्यथने ॥ तुदतीति तुदः ॥ विद ज्ञाने ॥ वेत्तीति विदः ॥ षुर ऐश्व
स्योः र्यदीप्त्योः ॥ सुरतीति सुरः ॥ शुभ शोभायां ॥ शोभते तत् शुभं ॥ ज्ञानातेश्च ॥ जानाते धातोः
कः प्रत्ययो भवति ॥ ज्ञा अवबोधने ॥ जानातीति ज्ञः ॥ आतोनपि ॥ कृधृगृदृभ्य इत्री
आ आमपि कः प्रत्ययो भवति ॥ कॄ विक्षेपे ॥ ऋत इर् ॥ किरतीति किरः ॥ धृञ् धारणे ॥
धरतीति ध्रः ॥ गॄ निगरणे ॥ गिरतीति गिरः ॥ ब्रूञ् व्यक्तायां वाचि ॥ ब्रुवीतीति
ब्रुवः ॥ भरतीति भ्रः ॥ ग्रह उपादाने ॥ गृह्णातीति ग्रहः ॥ प्रीञ् तर्पणे ॥ नुधातोः वि
क

र्गस्य॥ प्रीणातीति प्रियः॥ पचिनंदिग्रहादेर्युणिनि॥ पचादेर्नंदादेर्ग्रहादेश्च क्रमाद्युणिनि
इत्येते प्रत्यया भवंति॥ यथासंख्येन॥ डुपचष् पाके॥ पचतीति पचः॥ डुवपू बीजतंतु
संताने॥ वपतीति वपः॥ चरिचलिपतिवदीनां द्वित्वं वा ह्रस्वस्यागागश्च॥ चर गतिभ
क्षणयोः॥ चरतीति चराचरः॥ चरः॥ चल कंपने॥ चलतीति चलाचलः॥ चलः॥ हंतीति
घनाघनः॥ पत्लृ पतने॥ पततीति पतापतः॥ वद व्यक्तायां वाचि॥ वदावदः॥ वदः॥ णद अ
व्यक्ते शब्दे॥ नदतीति नदः॥ प्लुङ् गतौ॥ प्लवते ऽसौ प्लवः॥ क्षमुष् सहने॥ क्षाम्यतीति क्षमः
दिवु क्रीडाविजगी॥ दिव्यतीति दिवः॥ षेवृङ् सेवने॥ सेवते ऽसौ सेवः॥ अन प्राणने॥ प्राण
तीति प्राणः॥ दृशिर् प्रेक्षणे॥ पश्यतीति दर्शः॥ सृप्लृ गतौ॥ सर्पतीति सर्पः॥ डुभृ २

धारणपोषणयोः॥ बिभर्तीति भरः॥ षह मर्षणे॥ सर्वं सहते ऽसौ सर्वंसहः॥ पचादि
राकृतिगणः॥ टुनदि समृद्धौ॥ नंदति नंदयतीति वा नंदनः॥ [illegible]॥ वासङ् शब्दे॥ वा
वास्यते वासयतीति वासनः॥ मदी हर्षे॥ मादयतीति मदनः॥ दुष वैकृत्ये॥ दुष्यति
दूषयतीति वा दूषणः॥ राध साध संसिद्धौ॥ राधयतीति राधनः॥ साधयती
ति साधनः॥ वृधु वृद्धौ॥ वर्द्धते वर्धनः॥ रोर्युण्॥ रुङ् शब्दे इत्येतस्माद्धातोर्युण्
प्रत्ययो भवति॥ रु शब्दे॥ रौति रावयतीति वा रावणः॥ शुभ शोभायां॥ शो
भयतीति शोभनः॥ रुचीङ् प्रीतिप्रकाशयोः॥ रोचते रोचयते वा रोचनः॥
षह मर्षणे॥ सहते ऽसौ सहनः॥ तप संतापे॥ तपतीति तपनः॥ शमु दमु उपशमे॥

शम्यतीतिशमनः॥दाम्यतीतिदमनः॥जल्प व्यक्तयां वाचि॥जल्पतीतिजल्पनः॥र
मु क्रीडायाम्॥रमते सौ रमणः॥तृप प्रीणने॥तृप्यतीतितर्पणः॥दृप हर्षविमोह
ने॥दृप्यतीतिदर्पणः॥क्रदि आह्वाने रोदने च॥सं उपसर्गः संक्रंदतीतिसंक्रंदनः॥क
र्ष निष्कर्षे॥संकर्षतीतिसंकर्षणः॥पुञ् पवने॥पुनातीतिपवनः॥षूदि सूद हिंसा
याम्॥मधुसूदयतीतिमधुसूदनः॥अर्द गतौ याचने च॥उपपदजनात् जनार्दयती
तिजनार्दनः॥घृष संघर्षे॥संघर्षतीतिसंघर्षणः॥लूञ् छेदने॥लुनातीति
लवणः॥णत्वं निपात्यते॥शत्रुं दाम्यतीति शत्रुदमनः॥ ॥इति नंद्यादिः॥ ॥गृह्णा
तीतिग्राही॥षह मर्षणे॥उत्सहते ऽसौ उत्साही॥उद्वसते ऽसौ उद्वासी॥उद्भासते ४

वा

सौ उद्भासी॥छो छेदने॥छ्यतीतिछायी॥या प्रापणे॥यातीतियायी॥मंत्री गुप्त
भाषणे॥मंत्रयतीतिमंत्री॥गुपू रक्षणे गोपायी॥मृद आर्जवे॥संमर्दयती
तिसंमर्दी॥ष्टुञ् स्तुतौ॥निः उपसर्गः॥निरां स्तौतीति निःस्तावी॥रक्ष पालने॥निरां
तरक्षतीतिनिरारक्षी॥नितरां वसतीति निवासी॥डुवप बीजतंतुसंताने॥नित
रां वपतीतिनिवापी॥शो तनूकरणे॥नितरां श्यतीतिनिशायी॥नञ् सर्वेभ्यः
कृहृणीयाचवदिभ्यश्च॥नकरोतीति अकारी॥नहरतीति अहारी॥णीञ् प्रा
पणे॥ननयतीतिअनायी॥नयाचतीतिअयाची॥नवदतीतिअवादी॥रध ५
हिंसायाम्॥अपराधीतिअपराधी॥रुधिर् आवरणे॥अवरुणद्धीतिअवरोधी

ता

परिभवतीति परिभावी॥ ॥इति यङादयः॥ ॥दृशादेः शः॥ दृश हन् धेट्
घ्रा ध्मा पा दा धा एभ्यः शः प्रत्ययो भवति॥ शकारश्चानुबन्धः कार्यार्थः॥ शितिचत्तुर्यन्न॥
शिति प्रत्यये परे सत्त्वर्युति बादिषु पत्कार्यमुक्तं तद्भवति॥ दृशिरत्ने दृशः॥ पश्यः
हन्तृ हिंसागत्योः॥ गमास्वरे॥ इत्यकारलोपः॥ हनो घ्नः॥ गां हन्तीति गोघ्नः॥ धे
ट् पाने॥ धयतीति धयः॥ ज्वलादेर्धातोर्णः प्रत्ययो भवति॥ वा पक्षे पचादिप
चादित्वादः॥ ज्वल दीप्तौ॥ ज्वालयतीति ज्वालः॥ ज्वलः। तपतीति तापः॥ पचादि
त्वात् तपः॥ पथि गतौ॥ पंथतीति गच्छतीति पंथः॥ पीथः॥ इदितः॥ कार्ये ऽण्
धातोः कर्मणि प्रयुज्यमाने ऽण् प्रत्ययो भवति॥ कुंभं करोतीति कुंभकारः॥ ५

ग्रंथं करोतीति ग्रंथकारः॥ तंतून् करोतीति तंतुकारः॥ तंतून् वपतीति तंतुवापः॥
आतोडः॥ आकारान्ताद्धातोः कर्मण्युपपदे ड प्रत्ययो भवति॥ डित्वा डितोः॥
गां ददातीति गोदः॥ धनदः॥ त्रैङ् पालने। पापात्त्रायते ऽसौ पापत्रः॥ ना
म्नि च। नाममात्रे प्रयुज्यमाने ड प्रत्ययो भवति। पा पाने॥ द्वाभ्यां पिबतीति
द्विपः॥ गृहे तिष्ठतीति गृहस्थः॥ द्वौ वारौ जायते ऽसौ द्विजः॥ नाम्नि शोः
गिरिशेते ऽसौ गिरिशः॥ पादैः पिबतीति पादपः॥ डु गतौ॥ [illegible] द्रवतीति द्रु
मः॥ श्वचः श्वडौ॥ श्वचः श्व आदेशो भवति ड परे॥ उरसः सलोपो मुखा॥ उरसः
सकारस्य लोपो भवति ड प्रत्यये परे गमौ॥ मुपागमश्च वा॥ उरसा गच्छतीति

उरंगः॥उरगः॥विहायसोविहश्च॥विहायसोविहादेशोभवतिमुम्वाडौतेगमौ॥
विहायसिआकाशेगछतीतिविहंगः॥विहगः॥भुजगउरयोमुम्वाडौतेगमो॥भु
जंगवक्रंगछतीतिभुजंगः॥भुजगः॥आमंगआमंगः॥तुरंगः॥तुरगः॥ष्टरौ॥धा
तोर्नाम्निकार्येचप्रयुज्यमानेष्टौप्रत्ययौभवतः॥अस्थिहरतीतिअस्थिहरः
कः श्वा॥कवचहरः॥कुमारः॥धनुर्धरः॥रात्रौकुत्सितदेशेचरतीतिकुकचरः॥
टइवर्थः॥कुकचरी॥स्तगतौ॥पुरःसरतीतिपुरःसरः॥अग्रसरः॥पार्श्वशेतेऽसौ
पार्श्वशयः॥एएश्रमः॥खरवखि॥धातोर्नाम्निनिष्कार्येप्रयुज्यमानेखरवखिएतेप्र
त्ययाभवांति॥खितिसर्वपदस्य॥खितिप्रत्ययेपरेसर्वपदस्यअव्ययवर्जितस्य ६

मुमागमोभवति॥शत्रुंस्तंबालस्तनंधयःफलेग्रहोमिताग्रतोहरः॥दंतिनाथादेव
वातापिःकन्दरिवाच्यदः॥१॥करिषंकषसर्वंभात्कषःप्रियवदाह्वदः॥स्तनि
मेघभयात्कुरवःक्षेमभद्रप्रियाच्चवा॥२॥अग्निसितेचभुवोभावेकरणेचतुरानुगा
त्र॥विहायसःसुतोरोम्याहृदयच्चगनात्सवाद॥३॥गछरवःप्रत्ययस्यात्रभ्रंशो
धातोस्तुखिर्भवेत्॥अलंकृत्युदरेभ्यंस्युस्तथावाचंयमादयः॥४॥शत्रुंतक
रोतीतिशत्रुंतकरिः॥कःवत्सः॥स्तंबकरिः॥फलानिगृह्णातीतिफलेग्रहिः॥
फलस्यैदंतत्वंनिपात्यते॥रजोग्रहिः॥दंतिहरतीतिदंतिहरिः॥नाथहरिः॥देवा
नाप्नोतीतिदेवापिः॥वातापिः॥करीषंकषतीतिकरीषंकषः॥सर्वंकषः॥अभ्रंक
प्रो कूलंकषः॥

मः॥ प्रियंवदतीति प्रियंवदः॥ वशंवदः॥ स्तुतिं करोतीति स्तुतिंकरः॥ मेघंकरः॥ भयं
करः॥ क्षेमंकरः॥ क्षेमकरः॥ भद्रंकरः॥ भद्रकरः॥ प्रियंकरः॥ प्रियकरः॥ आशितेन भू
यते आशितंभवः॥ आशितो भवत्यनेनेति वा आशितंभवः॥ तुरं गच्छतीति तुरंगमः॥
भुजंगः वक्रं गच्छतीति भुजंगमः॥ विहायसि आकाशे गच्छतीति विहंगमः॥ सुतं गच्छ
तीति सुतंगमः॥ उरसः॥ सलोपो वाच्यः॥ खच्प्रत्यये परे॥ उरसा गच्छतीति उरंगमः॥
हृदयं गच्छतीति हृदयंगमः॥ जनं गच्छतीति जनंगमः॥ प्लवे गच्छतीति प्लवंगमः॥
आत्मानं बिभर्तीति आत्मंभरिः॥ कुक्षिं बिभर्तीति कुक्षिंभरिः॥ उदरं बिभर्ती
ति उदरंभरिः॥ अतः परं वाचंयम॥ दीन्कथयति॥ वाचंयमादयो निपात्याः॥ ७

वाचं यच्छतीति वाचंयमः॥ पुरं दारयतीति पुरंदरः॥ द्विषंतपः॥ विश्वं बिभर्तीति विश्वं
भरः॥ रथंतरतीति रथंतरः॥ पतिं वृणोतीति वा वृणीते सा पतिंवरा॥ धनं जयतीति ध
नंजयः॥ वसुं धरतीति वा धरते सा वसुंधरा॥ शत्रुं सहते असौ शत्रुंसहः॥ अरिं दम्य
तीति अरिंदमः॥ न मुक्ते हन्ते शत्रुंतमः॥ एते वाचंयमादयः॥ एजांखश्॥ एज
कंपने इत्यादीनां खश्प्रत्ययो भवति॥ खकारो मुमागमार्थः॥ शकारः शिति
वद्वत्कार्यार्थः॥ जनं एजयतीति जनमेजयः॥ ध्यैतेर्जेर्मन्यतेर्मुंजकुंजास्य
पुष्पतोधयः॥ नाडीमुष्टिमुनीपाणिकरस्तनीनासिकास्तनात्॥ १॥ ध्माः ख
रीवातघटितः॥ उडुज्ज्वलतोस्तु कुजनतः॥ अकर्विधुतिजातुदः स्यात्स्तर्योग्यात्तदर्हे

आस्यंधयः॥

स्तनपः॥२॥ ललाटदृश्भ्राष्ट्रेहोमितमानं नत्पचः॥ वातोत्तूलेरियायंदो हाकः शर्द्ध
तस्तथा॥३॥ मनु ज्ञाने। पंडितंमन्यः॥ मुंजंधयतीति मुंजंधयः॥ कूलंधयः॥ पुष्पंध
यः॥ नाडिंधयः॥ खशंतेरुर्वपदस्य कृखोवाच्यः॥ नाडीं धमतीति नाडींधमः॥ मुष्टिं
धमः॥ मुष्टिंधयः॥ अग्निंधयः॥ पाणिंधमः॥ स्तनंधयः॥ स्तनंधमः॥ नासिकंधयः॥
नासिकंधमः॥ खरिंधयः॥ खारिंधयः॥ घटिंधमः॥ रुजो भंगे॥ कूलमुद्रुजतीति कू
लमुद्रुजः॥ कूलमुद्वहतीति कूलमुद्वहः॥ संयोगांतस्य लोपः॥ अरुस्तुदतीति अरुंतु
दः॥ विधुंतुदः॥ तिलंतुदः॥ सूर्यंपश्यः॥ उग्रंपश्यः॥ ललाटंतपः॥ वहंलेढीति वहंलि
हः॥ अभ्रंलिहः॥ मितंपचः॥ नखंपचः॥ वातमजः॥ उज गतिस्थानाजनोपार्जनेषु॥
मितंपचः॥

८

मदी हर्षे। इरंमदतीति इरंमदः॥ उ हाक् त्यागे। शर्द्धंजहातीति शर्द्धंजहः॥ ख्युदूक
रणे। अभूततद्भावे आढ्यसुभगस्थूलपलितनग्नांधप्रियेषु ख्युन्। करणे ख्युद्रूपाच्यः
नाढ्यमनाढ्यं क्रियतेऽनेनेति आढ्यंकरणं। सुभगंकरणम्॥ स्थूलंकरणम्॥ पलितं
करणम्॥ नग्नंकरणम्॥ अंधंकरणम्॥ प्रियंकरणम्॥ हाराबाहनोऽन्तस्य घटः॥
संज्ञायां॥ दार्वाघाटः॥ चारौवा॥ चार्वाघाटः॥ चार्वाघातः॥ कर्मणि संपूर्वाद्वा॥ वर्णान्सं
हंतीति वर्णसंघाटः॥ वर्णसंघातः॥ पदसंघातः॥ जायापत्योष्टक्लक्षणवति कर्त्तरि॥
जायाघ्नः॥ अमनुष्यकर्तृके च पतिघ्नी॥ कापा॥ णिरेरेखा॥ पाणिघताडघौ शिल्पिनि
हंतेष्टक् टिलोपघत्वं निपात्यते पाणिताडयोरुपपदयोः॥ शिल्पिनि किं॥ पाणिघातः॥

नाड् घातः॥ राजघ इति वक्तव्यं॥ भजो ण्विः॥ भजेः सुबन्तकर्त्तरि ण्विः प्रत्ययो भवति
णो ह्यर्थः॥ वेः॥ वेर्लोपो भवति॥ भज सेवायाम्॥ अर्द्धं भजतीति अर्द्धभाक्॥ सुरभा
क्॥ तुरीशाहणे वेगं सहतौ सोढुं राषाट्॥ सहेः साढि॥ सहेः सकारस्य षकारो भ
वति साढि सति॥ तुराषाट्॥ तुराषाहः॥ वहः प्रणे॥ भारं वहतीति भारवाट्॥ भारवा
हौ॥ भारवाहः॥ वाहो वौ॥ वहो वाकारस्य ऊकारो भवति॥ शसादौ स्वरे परे॥ भारौहः
भारौहा॥ भारवाड्भ्यां॥ श्रमेरपि विण्वक्तव्यः॥ मोनो धातोः॥ प्रकर्षेण शाम्यती
ति प्रशान्॥ प्रशामौ॥ प्रशामः॥ प्रशान्भ्याम्॥ इत्यादि॥ अभूततद्भावे कृभ्वस्ति
योगे नाम्नः च्विः॥ चकारश्च्वौ दीर्घ इति विशेषणार्थः॥ च्वौ दीर्घ ईश्चास्य॥ च्वि प्रत्यये ९

परे अवर्णस्य ईकारो भवति॥ अन्यस्य स्वरस्य दीर्घो भवति॥ अमिथुनं मिथुनं क्रिय
ते इति मिथुनीकरणम्॥ अशुक्लः शुक्लः संपद्यमानस्तथा करोतीति शुक्लीकरोति॥
अकृष्णः कृष्णः संपद्यमानस्तथा भाव इति कृष्णीभावः॥ असहायः सहायः संपद्य
मानस्तथा स्यादिति सहायीस्यात्॥ अहेतु हेतुः संपद्यमानस्तथा स्यात्तदैति हेतूभू
तं॥ अव्ययस्येत्वं नेति केचित्॥ अदिवा दिवा संपद्यमानस्तथा स्यात् इति दिवास्यात्
॥ स्वस्ति स्यात्॥ न्संपद्य कर्त्तरि क्विं॥ अथहे अथहे भवतीति अथहे भवति॥ च्वौ सलोप
श्च॥ च्वि प्रत्यये परे सकारस्य लोपो भवति॥ चौ न औ प्रत्ययार्थमनुशासनतः॥
उत्सकं मनो रस्यासौ उन्मनाः॥ अनुन्मना उन्मनाः संपन्नस्तथा भवतीति

उन्मनीभावः॥ विगतं मनो यस्यासौ विमनाः। न विमनाः अविमनाः अविमनाः
विमनाः संपन्नस्तथा भाव इति उन्मनीभावः॥ डाच क्वचित्कथ्यः। अदुःखस्य
दुःखत्वेन करोतीति दुःखाकरोति॥ अथ मनिप् क्वनिप्॥ आदौ नाम्नि प्रयुज्य
माने आकारांतधातोर्मनिप् क्वनिप् वनिप् इत्येते प्रत्यया भवंति॥ आकार इत्यु
पलक्षणं॥ क्वचिदन्येभ्योपि दृश्यंते॥ सुष्ठु ददातीति सुदामा॥ क्वनिप्॥ युधीङ् सं
प्रहारे॥ राजानं युध्यते सौ राजयुध्वा॥ राजकृत्वा॥ सहकृत्वा॥ राजन् राड्वत्
॥ स्वामी॥ ईश्वईश्वरईतादौ केति दोसो मास्का निर्भवति शाछोर्वा अपि ल्दाधा
गेहाकपिबतीति निगीः किति ह्रस्वः केपि वानुक् अपि॥ सुष्ठु पिबतीति सुपीवा १०

॥ केवलेभ्योपि क्वनिप्॥ धेट् पाने॥ धयतीति धीवा॥ गै शब्दे॥ गायतीति गीवा॥
जहातीति हीवा॥ पिबतीति पीवा॥ ह्रस्वस्य पिति कृति तुक्॥ पिति कृति परे तु
गागमो भवति॥ षुञ् अभिषवे॥ सुनोतीति सुत्वा॥ इण् गतौ॥ प्रातः एतीति
प्रातरित्वा॥ वनिप्॥ घृतं पिबतीति घृतपावा॥ भूरिदावा॥ वनिपि जमस्या
त्तं वाच्यं॥ जनी प्रादुर्भावे॥ विजायते सौ विजावा॥ ओण एतीति अवावा॥ आवावानौ
आवावानः॥ इपि बनो नस्य रो वाच्यः॥ ओण एतीति अवावरी॥ क्विप्॥ उपपदो वेः
डुकृञ् कर्म करोतीति कर्मकृत्॥ चिञ् चयने॥ अग्निं चिनोतीति अग्निचित्॥
देवान्स्तौतीति देवस्तुत्॥ ष्टुञ् स्तुतौ॥ सोमं पिबतीति सोमपाः॥ दृशिर् प्रेक्षणे॥

सर्वं पश्यतीति सर्वदृक्॥ दिश॥ दिशा अतिसर्जने। दिशतीति दिक्॥ क्विपि
वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घः॥ संप्रसारणाभावश्च वक्तव्यः॥ वच्य
नयासा वाक्॥ प्रछ ज्ञीप्सायां। तत्त्वं पृच्छतीति तत्त्वप्राट्॥ ३॥ च्छ्वोः श्वाचौ
किति झले अनुनासिके क्विपि च॥ तत्त्वप्राट्। तत्त्वप्राश्वौ। तत्त्वप्ररः। आयतं स्तौ
तीति आयतस्तूः॥ स्रु सर्पणे। कटं प्रवते सौ कटप्रूः॥ गुरु गतौ जवते सौ जूः॥
सुष्ठु श्रयतीति सुश्रीः॥ नहिवृतिव्यधिरुचिसहितनिषु क्विबन्तेषु पूर्वपदस्य
दीर्घो वाच्यः॥ णह बंधने। उपसमीपेन नह्यते सा उपानत्॥ वृतु वर्त्तने॥ नितरां
वर्त्तते सौ नीवृत्॥ व्यध ताडने। मर्म विध्यतीति मर्माविद्॥ गमः क्वौ॥ १२

हन तनादीनां क्विपि अमस्य लोपो वाच्यः॥ कृपिवा। परितनोतीति परितत्॥ कटं
चिकीर्षतीति कटचिकीः॥ चिकिषतेः क्विप्॥ अतः इति अकारलोपः॥ हो पमितिषका
रस्य रः॥ रिपोर्दीर्घश्चेति सर्वरेफस्य लोपः॥ न तु संयोगान्तलोपः॥ रसे पदान्ते वेति
यकारात्। रेफात् उत्तरस्य संयोगान्तस्य सस्यैव लोपः स्यात्। नान्यस्य॥ कटचिकी
र्षौ। ध्यायतेः क्विपि संप्रसारणम्॥ ध्यै चिन्तायां॥ सुष्ठु ध्यायतीति सुधीः॥ द्युतिगमि
जुहोतीनां क्विपि द्वित्वं॥ द्युतेः सर्वस्य संप्रसारणं वाच्यं॥ द्युत दीप्तौ। द्योतते सौ दिद्यु
त्॥ गम्लृ गतौ॥ गच्छतीति जगत्॥ हु दानादानयोः॥ जुहोते दीर्घः॥ जुहोतीति जु
नयासा जुहूः॥ दृशेः क्वौ क्सश्चोपमानकार्ये॥ दृशो धातोः क्स क्वौ प्रत्ययौ भवतः
क्वौ

पमानेकार्ये सतिचकारात्क्विप्।। आ सर्वादेः।। एतेषु प्रत्ययेषु परेषु सर्वादेः सर्वस्य
देरात्वं भवति।। दृशिर्प्रेक्षणे।। अन्यइवदृश्यते ऽसौ अन्यादृशः।। अन्यादृक्षः।। अन्या
दृक्।। स इवदृश्यते ऽसौ तादृशः।। तादृक्।। यादृशः।। यादृक्।। एष इवदृश्यते ऽसौ ए
तादृशः।। किमिदमः कीश्।। किमशब्दस्य इदमशब्दस्य च कीईशौ इत्येता
वादेशौ भवतः।। क इवदृश्यते ऽसौ कीदृशः।। कीदृक्षः।। कीदृक्।। अयमिवदृश्यते
ऽसौ ईदृशः।। ईदृक्षः।। ईदृक्।। भवानिवदृश्यते ऽसौ भवादृशः।। भवादृक्षः।। भवादृक्
चकारात्समानस्य सः।। समान इवदृश्यते ऽसौ सदृशः।। अदसो अमूरादेशः
।। अदसशब्दस्य अमू आदेशो भवति।। क्वितिपरे।। असाविवदृश्यते ऽसौ अमूदृ २२

शः।। अमूदृक्षः।। अमूदृक्।। प्रत्ययोत्तरपदयोः।। प्रत्ययोत्तरपदयोर्युष्मदस्मदोरेकव
चने त्वमदइत्येतावादेशौ भवतः।। त्वमिवदृश्यते ऽसौ त्वादृशः।। युष्मानिवदृश्यते
ऽसौ युष्मादृशः।। अहमिवदृश्यते ऽसौ मादृशः।। मादृक्षः।। मादृक्।। वयमिवदृश्यते ऽ
सौ अस्मादृशः।। णिनिरतीतेकाले।। धातोरतीतेकाले शीले णिनिः प्रत्ययो भ
वति।। करणे उपपदे श्रेयजः।। णिनिर्वाच्यः।। यज देवपूजायां।। अग्निष्टोमेन अया
ऽक्षीत्।। अग्निष्टोमयाजी।। इनांशौ सौ।। उष्णं भुंक्ते इत्येवंशीलः उष्णभोजी।। हं
ते निंदायां णिनिर्वक्तव्यः।। पितरं अवधीत् हतवान् इति पितृघाती।। क्विप्कक्वनिप्डाः।। नि
धातोरतीतेकाले क्विप्क्रकनिप्वनिप्डा इत्येते प्रत्यया भवंति।। क्विप्।। ब्रह्म अवधीत् ह

परिताः स्वामापरिता। अप्युकश्चित्। स्वरमतिसिकांस्वरजितं। पक्षोत्रात। पश्नमः

लयानितिश्रलनस्ता। हचरा। स्तुन्तत्। कर्मण्यग्न्याख्यायामितिकर्मन्कृता। पपास्तत। मिन्नक्त। पुल्य
कृत्। शास्त्रकृत्। सोमंसुसावीत्इतिसोमसुत्। अग्निमचेषीत्अग्निचित्। क्वनिप्प्रपार
दृश्वा। वनिप्। अयाक्षीत्। यज्वा। ङः। संस्कारः। प्रज्ञा। द्विजः। क्तक्तवतू। धातोरतीते
कालेक्तक्तवत्प्रत्ययौभवतः। भावकार्ययोःक्तः। क्तवतुःकर्त्तर्येव। उक्ताविनौ। अस्नायि
इतिस्नातं। त्वया। भावेनपुंसकत्वं। केवलःक्तोधात्वर्थोनावद्वत्यभिधीयते। अकारि
इतिकृतः। कटस्तेन। सक्तह्यः सर्वं करोति सः कृतवान्। श्रितोनुम्। गत्यर्थादिकर्मकात्क्त
र्त्तरिक्तः। गत्यर्थादकर्मकाच्चधातोःकर्त्तरिक्तप्रत्ययोभवति। भावकर्मणोरपि। गंगागत
गमत्इतिगंगागतम्। नोपस्त्वनुदात्तानां। स्वामी। अस्थात्स्थितः। शमादेर्भमीत ७३

हरिरमामाश्रितो हः।। हरिरमानाश्रितः। पङ्कसेन रमा आश्रितो हः।। आधिशः ङः स्वामी

स्यक्लितिक्तःसेदीर्घोवाच्यः। अशमत्शान्तः। अदमत्दान्तः। श्विपूशीङ्स्वा। आसू
शिवस्तकनन्तरूत्त्र्जीर्यतीनीसोपसर्गत्वेसतिसकर्मकाणामपिकर्त्तरिक्तोवाच्यः। अधि ७२
सर्वाणामेषामाधारः कर्मसंज्ञः स्यात्। शेषमध्यशयिष्टशेषमधिशयितः। स्वर्ग
मध्यस्थात्। स्वर्गमधिष्ठितः।। देवदत्तः। आसनमध्यासिष्ट आसनमध्यासितः।।
भक्तोहरिमुपासिष्टभक्तोहरिमुपासितः।। आशिश्रियत्आश्रितः। एकादशीमुपव
सदितिएकादशीमुपोषितः।। वसितिधोरिट्। निष्ठायां। जनरवौ। नोरासंनिरायां। ता
मन्वजनिष्टतिमनुजातः।। हृषमारुक्षीत्। हृषमारूढः। जगदन्वजरत्। जगदनुजीर्णः
शिवः। रः। रेफाद्उत्तरस्यक्तस्यनत्वंभवति। क्नोयासेट्। उकारोपधात्परःसेट्क्तप्रत्य

योकिन्नभवति। द्युतङ् दीप्तौ॥ अद्युतत इति द्योतितं। अद्योतिष्ट द्युतितम्॥ ञिमुदीङ् ह
र्षे प्रमोदते इति प्रमोदितः। प्रमुदितः। साधुः॥ शीङ्स्विदिमिदिक्ष्विदिधृषमर्षसहेः
परौ सेटौ क्तक्तवतू कितौ न भवतः॥ शीङ् शिङ् इति प्रशायितः॥ अशायिष्ट इति शयितवा
न्॥ प्रास्वेदि प्रस्वेदितः। प्रास्विदत् प्रस्वेदितवान्॥ मृष क्षान्तौ॥ प्रमर्षि प्रमर्षितः॥ अमा
र्षीत् प्रमर्षितवान्॥ हलोवा कितस्तस्येट् क्तः॥ ह्रुङ् शोधने॥ पुपुषे ऽसौ पवितः। अपावि र
तः। अपविष्ट पवितवान्। हृतवान्॥ कितः उवर्णान्ता इवर्णान्तात् श्रिभिभ्यां च परस्य कित
प्रत्ययस्य इट् न भवति॥ रुङ् गतौ भाषणे च॥ अरुत इति रुतो। अभूत इति भूतः। वृञ् व
रणे। अवारि वृतः॥ श्यायि श्रितः॥ श्यायतेः संप्रसारणस्य दीर्घः॥ टुओश्वि गतिवृद्ध्योः १७

प्रशिश्वियत् शूनः॥ वेञो क्त्वः॥ ऊनं॥ आदीदितः॥ आदित इदित श्च धातोः परस्य क्तक्तवतोः
इट् न भवति॥ ञीतांतकवर्त्तमाने ऽपि॥ ञीतो धातूनां मतिबुद्धिपूजार्थानां च वर्त्तमाने वि
त क्तप्रत्ययो भवति॥ दस्तस्य नो द्भ्यां दकारादुत्तरस्य कितस्तस्य नत्वं भवति। दकारस्य न
कारः॥ ञिमिदा स्नेहने॥ मिदेर्गुणो ये प्रत्यये परे मेद्यतीति मिन्नं तैलेन भवत्ति इमे द्यती
ति मेदितं॥ भावकर्त्तरि चादितः॥ क्तक्तवतोरिड्वा॥ ञिष्विदा गात्रप्रक्षरणे॥ अस्वेदन
प्रस्विद्यतीति प्रस्विन्नः। प्रस्वेदितः॥ पुरुषः॥ ञिक्ष्विदा स्नेहनमोचनयोः क्ष्विद्यतीति क्ष्वि
ण्णः। क्ष्वेदितं॥ तेन ञिधृषा प्रागल्भ्ये॥ धृष्णोतीति धर्षितः॥ धृष्टः मनु ज्ञाने मन्यते सौ
मतः॥ नैकस्वरादनुदात्तात्॥ बुधङ् अवगमने॥ बुध्यते ऽसौ बुद्धः॥ हन हनने हन्यते

कय

हसितः। अद भक्षणे। अदो जग्धुः क्तिति। अदो जग्धु आदेशो भवति क्तिति तकारे परे ल्यपि च। जग्ध
तेस्म जग्धः। रदः। रेफदुत्तरस्य क्तस्य नत्वं भवति। कॄ विक्षेपे। ऋत इरू। घोर्विर्हसो विकिर्य
तेस्म विकिर्णः। जॄष् जॄष् वयोहानौ। अजरत्। ॠत इरू। घोर्विर्हसो विकिर्यतेस्म
अजरीत्। जीर्णः। अकरीत् इति कीर्णः॥ शरीरम्। हरी ङ हरनौ। हर्यतेस्म हर्णः।
ल्वादेर्दितः। ल्वादेरोदितश्च। धातोस्तो नो भवति। अलाविलूयतेस्म लूनः। ज्यंव
योहनौ। ग्रहां क्ङिति च। जिनातिस्म इति जीनः। भुजो कौटिल्ये। भुज्यतेस्म भुग्नः। ओल
स्जी लागे। हा मि। हीयतेस्म इति हीनः। षूङ्। सूङ्। दीङ्। डीङ्। मीङ्। धीङ्। रीङ्। लीङ्। व्रीङ्।
एते नयोदितः। षूङ् प्राणिप्रसवे। सूयतेस्म सूनः। दूङ् परितापे। दूयतेस्म दूनः। डी १५
ङ् विहायसा गतौ। डीङ् इड्भावः। डीयतेस्म उड्डीनः। दीङ् क्षये। दीयतेस्म दीनः। मी

निष्ठायां कर्तरि दीर्घो वक्तव्यः। दीर्घात् क्षियो निष्ठायां तस्य नो वाच्यः। अत्तो पीनःस्मि ३·४
ङ् वियोगे। मीयते इति मीनः। धीङ् आधारे। धीयतेस्म धीनः। रीङ् श्रवणे। रीयते इ
ति रीणः। लीङ् श्लेषणे। लीयतेस्म इति लीनः। व्रीङ् वरणे। व्रीयते इति व्रीणः। ओप्याय
ङ् वृद्धौ। प्यायः पी। प्यायः पीर्भवति निष्ठायां। प्यायतेस्म इति पीनः। ह्रीक्तपे। ह्रीय
ते इति ह्रीणः। ह्रीयतिस्म इति ह्रीणवान्। भावकर्मणोस्तु। अक्षायि इति क्षितं। अ
क्षायि क्षितः। क्षामो मपानिर स्वसंयोगादेरातो धातोर्यण्वतः निष्ठायां तस्य नो वाच्यः। द्रास्व
प्ने। द्रातिस्म इति द्राणः। स्त्यै स्तै रूपक्षपे। ग्लायतेस्म इति ग्लानः। म्लायतेस्म इति म्लानः।
त्रैङ् पालने। त्राणः [illegible]। त्राध्रेषु नत्वं वा निपात्यते। त्रायतेस्म त्राणः। त्रातः। घ्रा। घ्रि
इति घ्राणः। घ्रातः। क्षीयते इति क्षीणः। क्षीतः। नुद प्रेरणे। नोदतिस्म इति नुन्नः। नुत्तः।

विदॢ विचारणे। अवेदि इति विन्नः। वित्तः। उंदी क्लेदने॥ उंदि उन्नः। उत्तः। वा गति गंध
नयोः। निर्वाति स्म निर्वातः। विद सत्तायां। विद्यते स्म इति विन्नः॥ वित्तः॥ विद ज्ञाने
अवेदि विदितः॥ वेत्ति स्म विद ज्ञाने वित्ते विंद विचारणे॥ विद्यते विद सत्तायां विद ज्ञा
ने विंदति॥१॥ दो दत्ती॥ दा इत्यस्य दद् भवति॥ क्ति तकारे परे। चादायि इति दत्तः
अदात् दत्तवान्। स्वरान्तोपा। उपसर्गस्थात् स्वरादुत्तरस्य दा इत्यस्य वा तो भवति कि
ति तकारे परे॥ आदायि आत्तः। आदत्तः। अवादायि अवत्तः। अवदत्तः।। नाम्यंतोपसर्ग
स्य दीर्घो दादेशे तकारे परे॥ नितरां अदा इति नीत्ता। परि समं ताद्भावेन दीयते स्म
तत्परीत्तं॥ धो श्रो हि निष्ठायां॥ अधायि इति हितः। अधायि इति हितवान्। जहाते
श्च क्तिनि॥ जहाते धातोः क्तिनि परे हि आदेशो भवति॥ अहासीत् हिलहितवान्। ध्या १६

ख्याप्यो मूर्छिमदीत्यस्य नत्वाभावः॥ अध्यायि इति ध्यातः। अख्यायि इति ख्यातः। ष्टपाध
न स्खलने। [illegible] अपारि स्फूर्तः। मूर्छा मोहसमुच्छ्राययोः। राल्लोपो रेफादुत्तरस्य छ्वोर्लोपो भ
ति क्वौ झलादौ॥ क्विति ङिति च प्रत्यये परे॥ अमूर्छि मूर्तः॥ मदी हर्षे। अमादि मत्तः। यज
देवपूजा॥ यत्वं घुत्वं। संप्रसारणं। अयाजि इज्यते स्म वा इष्टः॥ डुवप् बीज
तंतुसंताने। अवापि उप्यते स्म तद् उप्तम्॥ वह प्रापणे। हो ढः। तथोर्धः। ढुत्वं ढलोपः
अवाहि उह्यते स्म वा ऊढः। व्येञ् संवरणे। अव्यायि वीयते स्म वीतः। ह्वेञ् स्पर्धायाम्
अह्वायि हूयते स्म वा हूतः। वद व्यक्तायां वाचि। अवादि उद्यते स्म उदितः॥ वच परि
भाषणे। अवाचि उच्यते स्म वा उक्तः। वसिक्षुधोरिट्॥ वस निवासे। अवासि उष्यते स्म
वा उषितः॥ क्षुध बुभुक्षायां॥ अक्षोधि क्षुध्यते स्म क्षुधितः। ञिक्षम् प्रमये। अक्षामि

त्॥ अस्वापि सुप्यते सुप्तः॥ ओँ व्रश्चू छेदने। ऊदितो वा निष्ठायामिट् न। स्कोः संयोगाद्योः। संप्र
सारणं। नत्वं॥ णत्वं। इति सिद्धं वृक्णः॥ शम स्वानाराात्वं निष्ठायां। अशमि शान्तः। अस्वा
निखातः। पचो वः। पचः परस्य क्तस्य वो भवति॥ अपाचि पक्वः। अपाक्षीत् पक्ववान्। क्षा
मो मः। क्षायः परस्य क्तस्य मो भवति॥ क्षै क्षये॥ आत्वं। अक्षासीत् क्षामः। शुषेः कः। शुषेः प
रस्य क्तस्य को भवति॥ शुष शोषणे। अशोषि शुष्कः। स्फायः स्फी॥ स्फायः स्फी भवति
निष्ठायां। स्फायी वृद्धौ। अस्फायि स्फीतः। धेट् पाने। स्त्रा मि। अधायि धीतम्।
गै शब्दे। अगायि गीतं। अपायि पीतम्। अदायि दीनम्। षोंतकर्मणि॥ माङ् माने॥ अमा
यि मितम्॥ सेटि निष्ठायां णिलोपो वाच्यः। अचोरि चोरितः॥ अपाचि पाचितः। क्त
क्तवतू निष्ठासंज्ञौ॥ ॥इति निष्ठा अधिकारः॥ ॥क्वसुकानौ एव वत्॥ धातोः क १७

सुकानौ प्रत्ययौ भवतः॥ अतीतेकाले तौ च द्वा युण् इतिवत् परस्मैपदात्मनेपदयोर्भवतः॥
लवादित्वाद्द्वित्वं। डुकृञ् करणे। चकार इति चकृवान्। हे चकृवन्। चकृवांसौ। चकृ
वांसः॥ वसोर्वः॥ चकुषः। चकुषा। चकृवद्भ्यां। चकुषी। चकुष्यौ। चकुष्यः। चकृव
त्तवद्भ्। चकुषी। चकुवांसि। चक्रे इति चक्राणः। भंजो आमर्दने। बभंज। बभंजा
न्। बभंजे। बभंजानः। जागृ निद्राक्षये। जजागार इति जजागवान्। जजागर्वान्। क
सादिषु नामे कस्वराणामा दन्तानां च घसेरेव क्वसोरिट् नान्येषाम्। भूसत्ता
यां। बभूव इति बभूवान्। भुवो वुक्। बभूवुषः। अद भक्षणे। आद इति आदिवान्॥
वस्योत्वादिट् भावः॥ आदुषः। ऋ गतौ॥ आर इति आरिवान्। दरिद्रा दुर्गतौ। दरि

ज्ञातेरनपि नित्या ञोपि त्वेनेट् । दद्दरिद्रौ । ददरिद्रिवान् । ददौ इति ददिवान् ॥ दकुषः
घस्लृ अदने । जघास इति जक्षिवान् । गम्लृ हन्लृ विद् विश् दृश् भांक्ष सो वेट् । जगाम इ
ति जग्मिवान् । जगन्वान् । जघान जघ्निवान् । जघन्वान् । विवेद विविद्विवान् । वि
विद्वान् । विवेश । विविश्वान् । विविशिवान् । ददर्श ददृश्वान् ॥ ददृशिवान् । इणः पू
र्वस्य दीर्घो नित्यः । ईयाय ईयिवान् । शतृ शानौ ति लवत् क्रियायां । क्रियापदे गम्य
माने धातोः परस्य शतृ शानौ प्रत्ययौ भवतः ॥ तौ च तिपू लेवत् । परस्मैपदात्मनेप
दयोर्भवतः ॥ पचतीति पचन् । आस्ते । पठतीति पठन् । तिष्ठतीति । गायतीति गायन् । गच्छति १८
। मुगाने ऽतः । अकारस्य आने परे मुगागमो भवति । पचते पचमानः । पठते सोपठ

मानः । यजते सो यजमानः । मन्यते सौ मन्यमानः । मनुते मन्वानः । करोतीति कु
र्वन् । कुरुते सो कुर्वाणः । किरतीति किरन् । क्रियते सौ क्रियमाणः । अस्ति इति सन्
संतौ संतः । उपसर्गस्थ निमित्तात् तदन्त नकारस्य णो वाच्यः । प्रपीयते सो प्रपीयमाणः ।
आसेरान ईः । आसेः परस्य अनघाकारस्य आ वाच्यः । प्रपीयते सो प्रपीयमाणः
। आसेरान ईः आसेः परस्य अन आकारस्य ईर्भवति । आस्ते आसीनः । वादीपो
रुडः । अवर्णात् परस्य शतृ प्रत्ययस्य वा नुगमो भवति ईकारे ईपि च परे । तुदन् । तुदं
ती तुदती । स्त्री कर्ता ते । भात् । भाभाति । भांति । भाति । श्यपोर्नित्यं । अप्रत्य
य प्रत्यय संबंधिनो वर्णात् परस्य शतृ नुन्नित्यं । नुम्न् भवति । ईपोः परः । भवती । ति

भवंती ॥ पचतीति पचंती । दीव्यंती । भजंती । द्विकस्तानं जक्षादीनां धातूनां नुम्प्रतिषेधो
वक्तव्यः ॥ शौघा । ददातीति ददत् । दधातीति दधत् । जक्षतीति जक्षत् । जागर्तीति जाग्र
त् । दरिद्रातीति दरिद्रत् ॥ चकास्तीति चकासत् । शास्तीति शासत् ॥ दातीति ददत् । द
दती ददती ॥ विदेर्वा वसुः । विदधातोः परस्मैपदाद्वा वसुरादेशो भवति । वेत्तीति विद्वा
न् । विदन् । अत्रभवत्तत्रभवच्छब्दौ पूज्यार्थे निपात्यते ॥ अत्रभवत्तत्रभवच्छब्दौ उक्तानुबं
धौ ज्ञातव्यौ ॥ तेन अत्रभवान् । तत्रभवान् । अत्रभवंतो मे मिश्राः ॥ तत्रभवद्भिर्भवत्या
दौ नर्णितं ॥ शीलेऽर्थे तृन् ॥ धातोस्तृन्प्रत्ययो भवति शीले स्वभावेऽर्थे । करणशीलः
कर्ता । हरणशीलो हर्ता । नयनशीलो नेता ॥ इष्णुस्नुक्नु ॥ धातोः शीलेऽर्थे इष्णुस्नुक्नुए २९

ते प्रत्यया भवंति । अलंकृञ् । निराकृञ् । प्रजन् । उत्पचू । उत्पत् । उन्मदने उन्म
दू । रुचू । अप । त्रप । वृतु । वृधु । सह । चर । भू । भ्राज । अंत एभ्यः इष्णु । अलंकरणशी
ल इति अलंकरिष्णुः । उत्पचनशील इति उत्पचिष्णुः । उत्पतनशील इति उत्पतिष्णुः
(क्रसन) उन्मदशील इति उन्मदिष्णुः ॥ नाहिडू स्व मेजाडो मदे नोदेस्तु तौर्वा । उन्मदनशील उ
न्मदिष्णुः । रोचनशीलो रोचिष्णुः । अपत्रपणशील इति अपत्रपिष्णुः । वर्तनशी
लो वर्तिष्णुः ॥ वर्धनशीलो वर्धिष्णुः । सहनशील इति सहिष्णुः । चरणशील इति
चरिष्णुः । भवनशील इति भविष्णुः । भ्राजनशीलो भ्राजिष्णुः । इष्णुप्रत्ययेषु
णेर्लोपाभावो वक्तव्यः । कारणशीलः कारयिष्णुः । ग्लाजिस्थाभू ग्लास्नु परिम्ल

ग्स्नुः एभ्यः ग्स्नुः॥ ग्लानशीलो ग्लास्नुः। जयनशीलो जिष्णुः। भवनशीलो भूष्णुः॥ जिर्भुवो
भावो नेट्॥ तिष्ठनशीलः स्थास्नुः॥ ग्लानशीलः ग्लास्नुः॥ पचनशीलः पक्ष्णुः॥
परिमार्जनशीलः परिमार्ष्णुः॥ त्रसगृधधृषक्षिप् विस्र एभ्यः क्नुः॥ त्रसि
उद्वेगे॥ त्रसनशीलः त्रस्नुः॥ गृधु अभिकांक्षायां॥ दिवादिः॥ गर्धनशीलो गृध्नुः॥
ञिधृषा प्रागल्भ्ये॥ धर्षणशीलो धृष्णुः॥ क्षेपणशीलः क्षिप्नुः॥ वेशनशी
लः विष्णुः॥ षाकौ कणः॥ धातोः शीलेर्थे॥ षाकन् उकञ् एते प्रत्यया भवंति॥ ज
ल्पभिक्षकुट्टलुंटवृङ् एभ्यः षाकः॥ जल्पाकः॥ भिक्षाकः॥ भिक्षाकः॥ कु २०
ट्ट छेदने॥ कुट्टनशीलः कुट्टाकः॥ लुंट स्तेये॥ लुंटनशीलो लुंटाकः॥ वृङ् सं

भक्तौ॥ वरणशीलो वराकः॥ सनंत आशंस भिक्ष एभ्यः उः प्रत्ययः॥ सनंताशंसयोर्भिक्षेश्च प्र
त्ययांतादाङः इर्वाछसस्तुत। विति धातोः शीलार्थं विनापि उः प्रत्ययो भवति॥ मोक्तुमिच्छतीति
मुमुक्षति॥ मुमुक्षतीति मुमुक्षुः॥ आङः शसि इच्छायां॥ शंसु कथने॥ आशासते आशंसुः॥ भिक्ष
ष याच्ञायां॥ भिक्षणशीलो भिक्षुः॥ लषपतपदस्थाभूवृषहनकमगमशॄ एभ्यः उकञ्॥
लाषुकः॥ पातुकः॥ पादुकः॥ स्थायुकः॥ भवनशीलः भावुकः॥ वृष वर्षणे॥ वाषुकः॥ धातुकः॥
कामुकः॥ गामुकः॥ शारुकः॥ स्पृहिगृहिपतिशीङ् एभ्यः आलुर्वाच्यः॥ स्पृह इच्छायां॥ ग
ृह ग्रहणे॥ स्पृहयालुः॥ पत ऐश्वर्ये॥ अयं चुराद्यो दंतः॥ आलौ णिलोपाभावो वक्तव्यः॥
स्पृहणशीलः स्पृहयालुः॥ गृहयालुः॥ पातयनशीलः पतयालुः॥ शयनशीलः शयालुः॥

नमादेरः॥ नमकंपिस्मिङ्नञ्जसकमहिंसदीपृभ्यो रप्रत्ययो भवति॥ शीलेर्थे॥ नमनशीलो नम्रः॥ कपि चलने। कंपनशीलः कंप्रः॥ स्मिङ् ईषद्धस
ने। स्मयनशीलः स्मेरः। नञ्पूर्वो जसि क्रियासातत्ये॥ जसु मोक्षणे। अजसनशी
लं अजस्रं॥ कामनशीलः कम्रः॥ हिसि हिंसायां॥ हिंसनशीलो हिंस्रः॥ दीपनशी
लो दीप्रः॥ घस्मादेः स्मरः॥ घस् सृ अद एभ्यः क्मरच्प्रत्ययो भवति शीलेर्थे॥ घासन
शीलः घस्मरः॥ सृ गतौ। सरणशीलः सृमरः॥ अद भक्षणे॥ अदनशीलो अद्मरः॥ भि
दि विछेदे॥ कुरो वाच्यः॥ भेदनशीलो भिदुरः॥ विदुरः॥ छिदिर् द्वैधीकरणे॥ छिदुरः
॥ भासादेर्घुरः॥ भास् भञ्ज् मिद् एभ्यो घुरच्प्रत्ययो भवति शीलेर्थे॥ भासनशीलो २१

भासुरः। चजोः कगौ घिति॥ चकारजकारयोः ककारगकारौ भवतो घिति प्रत्यये प
रे। भंगुरः॥ ञिमिदा स्नेहने। मेदनशीलो मेदुरः॥ यङ ऊकः। यज जप दंश वद एभ्यो
यङन्तेभ्य ऊकप्रत्ययो भवति शीलेर्थे॥ लुक् तत्सन्नियोगे यंगो लुक् भवति॥ अ
तिशयेन यजते याजप्यते इति॥ यायजूकः॥ दंदशूकः॥ वावदूकः॥ जागर्तेरू
को वाच्यः॥ जागृ निद्राक्षये॥ जागरूकः॥ इण्नश्जिसर्तिभ्यः क्वरप्॥ ग
त्वरस्यापि तित्वात् तुक्॥ इत्वरः॥ नश्वरः॥ जित्वरः॥ सृत्वरः॥ गत्वरः॥ गत्वरश्च नि
पात्यते शीलेर्थे॥ भियो क्रुक्लुकनौ॥ भीरुः॥ भीलुकः॥ स्थेशभासपिसकसो वरच्॥ स्थ
गतौ इति शकुः॥ वदिङ् अभिवादनस्तुत्योः॥ वदंतेयं दारुं॥ इषे कष्ठ॥ इषेउ

प्रत्ययो णितः शास्त्र ॥ इच्छतीति इक्षुः ॥ स्थाईशाउ ॥ भास पिस कस एभ्यो वर
प्रत्ययो भवति तस्या वार ॥ ईश्वरः ॥ भास्वरः ॥ पिस गतौ ॥ पिस्वरः ॥ कस गतौ ॥ कस
तीति कस्वरः ॥ अंगमध्ये यड् प्रत्ययः ॥ वा अन्यत्र लुक् प्रत्यया संयोगे विभाषापि
वायङो लुक् भवति ॥ जंगम ॥ आदन्तः क्वि क्विप् भवति ॥ आकारांतात् इकारांता ऊ निमि गमि
भ्यश्च शी लेर्थेभूते का ले क्वि प्रत्ययो भवति एभ्या दिवधातो च बहुलं ॥ रामः सोमं पपि प
से इति गाश्च क्विर द्भुतं ॥ पाजकान्च विराज क्विः पौंडरीके म द्वि जान् ॥ तदा जक्षि मस
श्वयेनमि नर्द पगणो पितामृ ॥ ब्राह्मणानां सु विद्वी गणे ऊ ग्मिश्व नं मुदं ॥२॥ ॥ इति
श्रीशाधिकारः ॥ ॥ अथोणादयः ॥ सर्वे उणादयः ॥ सर्वस्मिन्काले उणादयः प्रत्य २२
यो भवंति ॥ कृवापाजिमिस्वदिसाधिअशूभ्य उ-एभ्य उण् ॥ करोतीति कारुः ॥ आ

तो युक् ॥ वातीति वायुः ॥ पिबतीति पायुः ॥ जयतीति जायुः ॥ डुमिञ् प्रक्षेपे ॥ मिनोती
ति मायुः ॥ स्वद आस्वादने ॥ स्वदते स्वादयति वा स्वादुः ॥ साध संसिद्धौ ॥ साध्नोति सा
धयति वा साधुः ॥ अशूङ् व्याप्तौ ॥ आशुः ॥ सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुः ॥
मस्ति परिमाणे परमाने च ॥ क्रुश आह्वाने रोदने च ॥ षिञ् बंधने ॥ सिनोतीति
सेतुः ॥ तनोतीति तंतुः ॥ गच्छतीति गंतुः ॥ मास्यते ऽसौ मस्तुः ॥ षचङ् बंध
ने ॥ सचते ऽसौ सक्तुः ॥ अवते वकारस्य उकारः ॥ ओतुः ॥ हि गतौ वृ ॥
हिनोतीति हेतुः ॥ दधातीति धातुः ॥ क्रोशतीति क्रोष्टा ॥ जायते जन्यते
वा जंतुः ॥ अवतेर्युक् ॥ संप्रसारणं च ॥ अवर गतौ कीतौ प्रीतौ च गो

धृतौ श्रुतौ भा होऽश्लेषे अर्थने वेशे भगे हृष्यौ ग्रहे वधे सामर्थ्ये वगमे कामे त्य
तौ॥ अवतीति ऊमः॥ ऊमौ॥ ऊमः॥ अतिबृहिभ्यां मनिण्॥ अत सातत्य
गमने॥ अततीति आत्मा॥ बृहि वृहि वृद्धौ॥ मन्युपधाया ऋरः॥ म
निपरे उपधाया ऋकारस्य रेफो भवति॥ बृहतीति ब्रह्मा॥ वर्हणा ला
त्व ग्ला॥ धृ घ्रा स्तु सु हुञ् भा या वा य ज नी श्यै हु रे पदो मः॥ धृ धार
णे॥ ध्रियतेऽसौ धारणा धर्मः॥ घृ सेके घरती घर्मः॥ ग्म गतौ॥ ऊछती
तिजर्मः॥ स्तौतीति स्तोमः॥ सुनोतीति सोमः॥ हूयते होमः॥ म्री २३
यते मर्मः॥ हूयतीति होमः॥ भातीति भामः॥ यातीति यामः॥ वाती

धिन

ति वामः॥ यज्ञ ड व्याधौ॥ यज्ञते यक्ष्मः॥ नीयते नयति नेमः॥ श्यैङ् गतौ
॥ स्यायते श्यामः॥ रायते रामः॥ पद्यते तत्पक्ष्मं॥ भी धुवोर्मक्॥ ञि
भी भये॥ बिभेतीति भीमः॥ धूनोतीति धूमः॥ ध्वादेर्किः॥ टुम्र
कंपने॥ धूयते इति धूलिः॥ अगिरंघिगत्यर्थः॥ अङ्कते सा अंगुलिः
॥ इदितः॥ रघते फूर्न लोपश्च॥ रघते शास्तीति शत्रूणी गच्छत्यसौ रघुः
॥ भविष्यार्थे णिनिः॥ आगमिष्यतीति आगामि भविष्यतीति भावी॥
गमेडोः॥ गच्छतीति गौः॥ ग्लानुदिभ्यां डौः॥ ग्लायतीति ग्लौः॥ नुद
प्रेरणे॥ नुदतीति नौः॥ स्त्यायते स्त्री स्त्ये ड्रट्॥ स्त्यै शद्ह संघात

यो:॥ टिलोपः॥ यनः॥ ष्टितः॥ स्त्यायति समूहं करोतीति सा स्त्रीः॥ ल
क्षेरीमुट् च॥ लक्ष दर्शनांकनयोः॥ लक्ष्यते पुमान् अनया सा पुण्या
लक्ष्मीः॥ राजादेः कनिन्॥ राज धन्व युत्से प्रतिदिव वृष तक्ष दश पचि
षप अश नु राजादयः॥ राजते सो राजा॥ धन्व गतौ॥ धन्वतीति धन्वा
॥ द्युग तौ द्यौतीति द्युवा॥ प्रतिदीव्यतीति प्रतिदिवा॥ यौतीति युवा
वृषते वृषा॥ तक्ष काष्ठे॥ तक्ष्णोतीति तक्षा॥ पचि विस्तारे॥ पचंते
पञ्चा॥ षप समवाये॥ अशूङ् व्याप्तौ॥ अनयोस्तुड्वा वक्तव्यः॥ सपतीति स २५
प्त॥ अश्नुते इति अष्ट॥ णु स्तुतौ॥ अस्य गुणः॥ नवंतीति नव॥ दश

तीति दश॥ सर्वधातुभ्यः॥ असुन्॥ वच परिभाषणे॥ उच्यते तत् वचः॥ पीङ्
पाने॥ पीयते तत् पयः॥ तिज्यते तत् तेजः॥ तप्यते तपः॥ रंज रागे॥ अमिना मो
नो वाच्यः॥ रज्यते तत् रजः॥ रक्ष पालने॥ रक्षतीति रक्षः॥ अर्चिरुचिशुचि
हुसृपिछादिभ्यः इस्तुन्॥ अर्च पूजायां॥ अर्च्यते तत् अर्चिः॥ रुच दीप्तौ॥ रो
चिः॥ शोचिः शुच शोके॥ हु दानादनयोः॥ हूयते तत् हविः॥ सृप्लृ गतौ॥ सर्पिः
छाद संवरणे॥ छादेरिस्मन्त्रन्क्विषु ह्रस्वः॥ छदिः॥ उछृदिर् दी
प्तिदेवनयोः॥ छर्दिः॥ सर्वधातुभ्यः ष्ट्रन्॥ तनु विस्तारे॥ तन्यते तत् त
न्त्रं॥ मन्यते सो मंत्रं॥ यं त्रम्॥ छाद्यते छत्रं॥ क्रियते तत् कर्म॥ ध्रियते तत्

वर्म ॥ दीयते तद्दाम ॥ धीयते तद्धाम ॥ छद्यते तच्छद्म ॥ धनाति च छिदि उः ये
पित पिञ् निपा जिभ्यः ॥ उस नद् ॥ धन्यते तद्धनुः ॥ ऋ गतौ ॥ ऋ णः ॥ अर्यते तद
अरुः ॥ चक्ष्यते तच्चक्षुः ॥ उप्यते तद्वपुः ॥ पॄयते तत्परुः ॥ तप्यते तत्त
पुः ॥ जन्यते तज्जनुः ॥ यज्यते तद्यजुः ॥ युहावहभ्यां निन्यो निः ॥ यौतीति
योनिः ॥ ओहाक् त्यागे ॥ जहातीति हानिः ॥ वहतीति वह्निः ॥ अगि गतौ ॥ अंगते ग्निः
सौ अग्निः ॥ इदि चदि शाकि रुदिभ्यो रप्रत्ययो भवति ॥ इंदतीति इंद्रः ॥ चदि आ
ह्लादे ॥ चंदतीति चंद्रः ॥ शक्नोतीति शक्रः ॥ रोदतीति रुद्रः ॥ अवतृस्तृतंत्रि
भ्यः ईः ॥ अवतीति अवी ॥ तरतीति तरी ॥ स्तृणोतीति स्तरी ॥ तंत्रि स्व धारणे २५

॥ तंत्रतीति तंत्री ॥ सौ कृ यं जिमः ॥ सुखेन भिद्यते तत्त् भिदे जिमं ॥ भोक्तुं स्तक
रं कष्टम् ॥ पचे जिमं ॥ कृच्छ्रं ॥ पक्तुं सकराः ॥ पचे जिमा ॥ छुकः ॥ उणादयोऽप
परिमिताः ॥ प्रयोगमनुसृत्य मोक्तव्याः ॥ ॥ इत्युणादयः ॥ ॥ तुमुन्नदर्था
यां भवति ॥ धातोर्भविति तुमुन्प्रत्ययो भवति ॥ तदर्थायां क्रियायामुपपद्यमा
नायां ॥ भोक्तुं व्रजति ॥ पठितुमिछन् स्नातुमिच्छते ॥ तुमर्थे ण्वुल् वक्तव्यः ॥ तदर्श
दर्शको व्रजति द्रष्टुमित्यर्थः ॥ कालसमयवेलासु तुमुन् ॥ भोक्तुं कालः ॥ स
मये तु समयः ॥ स्नातुं वेला ॥ इच्छार्थेषु तत्कर्तृकेषु तुमुन् ॥ भोक्तुमिच्छति ॥ इवाह
ति वा ॥ घञ् भावे ॥ धातोर्भावेऽर्थे घञ् प्रत्ययो भवति ॥ चजोः कगौ घिति ॥ प

मनं पावकः ॥ त्यज हानौ ॥ त्यागः ॥ यागः ॥ इण् गतौ ॥ आयः ॥ एउ स्तुतौ ॥ भवनं भा
वः ॥ भावकरणोर्घञ् ॥ रञ्जेर्नलोपो वाच्यः ॥ रज्यतेऽनेनेति रागः ॥ रंजनं रागः
॥ रजतीति रंजकः ॥ रजकः ॥ वुन्प्रत्ययः ॥ नृतिखनिरंजिभ्यो वुन् लोपो वा ॥ स्त्री
चेत् रजकी ॥ नदादेः ॥ आदेङ्कि ॥ रज्यतेऽस्मिन्निति रंगः ॥ आतो युक् ॥ दायः
पायः ॥ रभ राभस्ये ॥ रभानोर्घञ्नुम्वाच्यः ॥ आरभ्यतेऽस्मिन्निति आ
रंभः ॥ संज्ञायाम् कर्त्तरिच ॥ कर्त्तृवर्जिते कारके भावे च घञ्प्रत्ययो भवति
संज्ञायां विषये ॥ प्रतिकार्यमाक्रियत इति प्रत्याहारः ॥ दीयते सो दायः ॥
विक्रियतेनेनेति विक्रायः ॥ आधानाधारयोर्व्यंजनान्नीच घञ्वक्तव्यः ॥ मृज्ये २६

र्गिति हद्विर्वाच्या ॥ अपामृज्यतेऽनेनेति अपामार्गः ॥ लिख आलेखने ॥ लिख्य
तेऽस्मिन्निति लेखः ॥ आचरत्यस्मिन्निति आचारः ॥ इङ् अध्ययने ॥ उपाधीय
तेऽस्मादित्युपाध्यायः ॥ मदि मोहे ॥ मदः ॥ मंदादेः सोपसर्गस्य घञभिधानभो
पश्चात् उन्मदस्य उन्मादः ॥ प्रमादः ॥ प्रमदः ॥ प्रमद्यतेऽनेनेन प्रमदः ॥ स्वरादेः ॥
ऋउलवर्णान्तेभ्यो धातुभ्यो अप्रत्ययो भवति भावादौ घञोपवादः ॥ चीयतेसौ दी
चयः ॥ जयः ॥ नयः ॥ नवः ॥ भवः ॥ स्तवः ॥ ऋ विक्षेपे ॥ न्रियते विक्षिप्यते कामादिभि
रितिनरः ॥ कृ विक्षेपे ॥ करः ॥ गरः ॥ तरः ॥ मदाम् ॥ मदादीनाम् अप्रत्ययो भवति भा
वादौ ॥ मदः ॥ पणः ॥ शमः ॥ दमः ॥ श्रमु खेदे ॥ श्रमः ॥ भ्रमः ॥ हिंसि हिंसायाम् ॥ हिं

स्वर्णविपर्ययश्च ॥ हिनस्तीति हिंसः ॥ षिञ् बंधने ॥ विशेषेण सीयते बध्यते इति
विषयः ॥ मूर्त्तौ च घनः ॥ मूर्त्तौ काठिन्ये परिच्छेदे चाभिधेये हन्तेरप्प्रत्ययो भवति ॥
घनादेशश्च ॥ दधिकाठिन्यं दधिघनः ॥ सैंधवघनः ॥ हनो वधादेशश्चाप्रत्यये
त्ये वधः ॥ ट्वितोथुः ॥ ट्वितो धातोरथुप्रत्ययो भवति भावादौ ॥ टुवेपृ कंपने ॥
वेपथुः ॥ टुनदि समृद्धौ ॥ नंदथुः ॥ श्वयथुः ॥ ड्वितः त्रिमक् ॥ ड्वितो धातोस्त्रिम
क्प्रत्ययो भवति ॥ तेन धात्वर्थेन निर्वृत्तेर्थे वाच्ये सति ॥ क्रियाया निर्वृत्तः ॥ प
क्त्रिमः ॥ याचनक्रियायां निर्वृत्तं ॥ याचित्रिमं ॥ नङ् क्वौ ॥ धातोर्नङ् किद्दत्ये
तो प्रत्ययो भवतो भावादौ ॥ यजयाचयतविच्छप्रच्छरक्षस्वपिभ्यो नङ् प्रत्य २७

य ॥ स्तोः श्चुभिः श्चुः ॥ यज्ञः ॥ याञ्ञः ॥ यती प्रयत्ने ॥ यत्नः ॥ छः शे ॥ छकारस्य
शकारो भवति नेपरे ॥ विच्छ गतौ ॥ विश्नः ॥ प्रश्नः ॥ शकादेशः ॥ संप्रसार
णाभावार्थः ॥ रक्ष्णः ॥ स्वप्नः ॥ उपसर्गकर्माधारेषु दाधोः किप्रत्ययः ॥ अं
तर्द्धिः ॥ आदिः ॥ उदकं निधीयते ऽस्मिन् उदधिः ॥ उदकस्य उदादेशः ॥ प
योधिः ॥ धातो नपि ॥ विधानं विधिः ॥ संधानं संधिः ॥ धनं निधीयते यत्र सो
नो निधिः ॥ युट् ॥ धातोर्भावे युट् प्रत्ययो भवति ॥ युवोरनाकौ ॥ ज्ञानं ॥ कर
णं ॥ हरणं ॥ देवनं ॥ उद्यते ऽस्मात् तदेहनं ॥ दानं ॥ भूषणं ॥ उदः स्थास्तंभोः स लो
पः ॥ उदुपसर्गात्परस्य स्थादेः सकारस्य लोपो भवति ॥ उत्थीयते ऽनेन तदुत्थानं

स्तंभरोधने ॥ उत्तंभ्यते तत् उत्तंभनं ॥ साधनाधारयोः ॥ साधने आधारे चा
र्थे युट् प्रत्ययो भवति ॥ पच्यते अनेनेति पचनोऽग्निः ॥ पच्यते यस्यां सा पचनी ॥
स्थाली ॥ इणः ॥ सुषुखल्युः ॥ ईषदादिषु दुर्वस्य प्रयुज्यमानेषु खल् युट् इत्येतौ प्र
त्ययौ भवतो भावादौ ॥ भकारप्रत्यये इत्यापवार्थः ॥ ईषत्करः ॥ पंचो हरिणा ॥ सु
करः ॥ दुष्करः ॥ दुर्योधनः ॥ युधसंयुधौ ॥ सुयोधनः ॥ कर्तृकर्मणोश्च्व्यर्थयोरी
षदादिषु चोपपदेषु भूकृञोः खल् ॥ दुराढ्यं भवं भवती ॥ ईषदाढ्यं भवं भवता ॥
ईषदाढ्यंकरः ॥ दुराढ्यंकरः ॥ स्वाढ्यंकरश्चैत्रो भविता ॥ सुपानः ॥ दुष्पानः ॥ ई
षत्पानः ॥ सोमो भवता ॥ दुःशासनः ॥ सुशासनः ॥ दुःशासः ॥ ॥ इति भावाधि २८

धिकारः ॥ ॥ अथ कृत्यप्रक्रिया ॥ तव्यादीनां कृत्यसंज्ञा पाणिनीयानां ॥ कृत्या
भावः ॥ कर्मणोरेव ॥ तव्यानीयौ ॥ धातोस्तव्यानीयौ प्रत्ययौ भवतो भावकर्मणोरेव ॥
एध्यते तत् एधितव्यं ॥ एधनीयम् ॥ त्वया ॥ वसः कर्तरि त्व्यो णिद्वक्तव्यः ॥ वसत्य
सौ वास्तव्यः ॥ भावस्यैकत्वादेकवचनं नपुंसकत्वं च ॥ भूयते तत् भवितव्यम् ॥ आ
स्यते तत् आसनीयम् ॥ कर्तव्यः ॥ करणीयो धर्मस्त्वया ॥ अयाते तत् अयाणीय
म् ॥ ईल्योयहौ ॥ गृह्यते तत् ग्रहीतव्यं ॥ वीयते तत् वरीतव्यम् ॥ स्वराद्यः ॥ स्व
रान्ताद्धातोर्यप्रत्ययो भवति ॥ चीयते तत् चेयम् ॥ नीयते तत् नेयम् ॥ जीयते त
त् जेयम् ॥ तव्यादयोऽपि ॥ चेतव्यः ॥ चयनीयः ॥ चिकीर्षते तत् चिकीर्षम् ॥ दिरस्य

तेतत्दिस्यम् ॥ क्षय्यजय्यौ शक्यार्थे निपात्येते ॥ क्षेतुं शक्यं क्षय्यं ॥ जेतुं शक्यं जय्य
म् ॥ शक्यार्थे किं क्षेयं पापम् ॥ जेयं मनः ॥ क्रय्यश्च ॥ क्रय्यस्तदर्थे ॥ क्रयार्थे प्रसा
रितं क्रय्यम् ॥ क्रेयमन्यस्मात् ॥ आकारान्ताद्धातोर्यप्रत्ययो भवति आकार
स्य च एकारः ॥ देयं ॥ गीयते तत् गेयं ॥ ज्ञीयते तत् ज्ञेयं ॥ पीयते तत् पेयम् ॥ पु स्त्र
शकादिभ्यः ॥ आकारोपधात्पवर्गान्तात् शकादिभ्यश्च यप्रत्ययो भवति ॥ शप्यते तत् शप्य
म् ॥ लभ्यते तत् लभ्यम् ॥ शकसहगदमदचरयमतकशसचतयतजनहन ए
ते शकादयः ॥ शक्यते तत् शक्यम् ॥ गद्यम् ॥ सह्यते तत् सह्यम् ॥ चर्यं ॥ यम्यं ॥
तक्यम् ॥ शस्यं ॥ चत्यम् ॥ जन्यते तत् जन्यम् ॥ यत्यम् ॥ हनो वधादेशः ॥ वध्य २५

म् ॥ ऋहलान्ताद्घ्यण् ॥ ऋवर्णान्ताद्धलान्ताच्च धातोर्घ्यण्प्रत्ययो भवति ॥ क्रियते तत्
कार्यम् ॥ वार्यं ॥ भावे घ्यण्वाच्यः ॥ हास्यम् ॥ हनो घात् ॥ घात्यम् ॥ चजोः कगौ घि
ति ॥ पच्यते तत् पाक्यं ॥ रोग्यम् ॥ अन्वितक्रियाकारकपदस्तु समुदायान्यत्र वा
च्यं ॥ भोज्यं भक्ष्ये ॥ अन्यत्र भोग्यम् ॥ उच्यते तत् वाक्यम् ॥ वचेः शब्दसंज्ञायामक
र्तवाच्यं ॥ यजयाचरुचप्रवचर्चत्यजतर्जगर्जभुजां घ्यणि कत्वाभावः ॥
याज्यं ॥ याच्यं ॥ रोच्यं ॥ प्रवाच्यं ॥ अर्च्यम् ॥ त्याज्यम् ॥ तर्ज्यं ॥ गर्जः शब्दे ॥ गर्ज्यं ॥ भो
ज्यं ॥ उरावश्यके ॥ उवर्णान्ताद्धातोरावश्यकेऽर्थे शब्दे उपपदे सति घ्यण्प्रत्ययो भव
ति ॥ उदितोऽर्थः प्रत्ययः स्वरवत् ॥ ईकारौकारौ निमित्तीयः प्रत्ययः स्वरवद्भवति

॥तुंपेदवश्यमः कृत्ये तुंकाममनसोरपि॥ समो वा हिततततयोर्मांसस्य पचियु
ड्घञोः॥ अवश्यंलाव्यो अवश्यलाव्यः॥ भोक्तुकामः॥ भोक्तुमनाः॥ संहितम्॥ स
हितं॥ संततम्॥ सततम्॥ मांसपचनं॥ ल्युड्घञोः॥ पचिपरे मांसस्य अकारो
वा लुप्येत॥ मांसस्यपचनी॥ मांस्पचनम्॥ मांस्पाकः॥ मांसपाकः॥ ऋदुपधा
त्क्यप्॥ ऋकारोपधात् धातोः क्यप्प्रत्ययो भवति॥ कृती छेदने॥ कृत्यं॥ दृश्यं
॥ दृश्यम्॥ कृपिचृत्योर्न॥ कृप सामर्थ्ये॥ कल्प्यं॥ चृती हिंसे॥ चर्त्यं॥ मृजो वा॥
मृज्यं॥ मार्ज्यं॥ भुवो भावे॥ नाम्नि उपपदे भुवो क्यप्प्रत्ययो भवति॥ ब्रह्म ३०
णो भावः॥ ब्रह्मभूयं॥ गतः॥ नाम्नि किं भवतीति भव्यम्॥ हनस्तु हद्भ

सगुपरकन एतेभ्यः वाचः तुक्॥ हूयते अनेनेति हूत्यः॥ स्तुत्यः॥ इत्यः॥ दृङ् आद
रे॥ दृत्यम्॥ आदृत्यं॥ शासेरिः॥ शिष्यः॥ जुषि प्रीतिसेवनयोः॥ जुष्यः॥ खनेः इत्
क्यपि वा च्यम्॥ खेयम्॥ कृत्वाच्च क्यप्॥ कृ स्वा धातोर्भावे क्यप्प्रत्ययो भवति
॥ तस्य च हलेन दंतस्य च हलम्॥ स्तुयते तत् स्तुत्यम्॥ क्रियते तत् कृत्यं॥
कृत्यस्य क्यपि॥ चीरिङ् वक्तव्यः॥ युग्भावश्च॥ तेन कृत्या क्रिया॥ इङ् इने
कारेणोच्चाद्देरोगस्येव वक्तव्यः॥ भिद्योद्ध्यौ नदे निपात्यौ॥ भिनत्ति कूलमि
ति भिद्यः॥ उज्झति जलमिति उध्यः॥ नदः॥ वृषोर्वा क्यप्॥ वृत्यम्॥ कार्य
म्॥ वृष वृष्टौ॥ वृष्यं॥ वर्ष्यं॥ येऽर्ते भावकार्ययोर्विहितास्तव्यादयस्ते॥ हेवि

धौ चवक्तव्या ॥ दारोऽर्हे दर्शा ॥ दर्शनार्हे कृत्याः ॥ दर्शनीयः ॥ दृश्यः ॥ मानपूजा
यां ॥ मानितुं योग्यः ॥ माननीयः ॥ मनु ज्ञाने ॥ मननीयः ॥ स्वाध्यायोऽध्येतव्यः ॥
मन्तव्यः ॥ सप्रत्ययान्तादपि ॥ नितरां निदिध्यासितुमर्हः ॥ निदिध्यासितव्यः ॥
विजिज्ञासितव्यः ॥ ॥ इति कृत्यधिकारप्रक्रिया ॥ ॥ अथ स्त्र्यधिकारः
स्त्रियां क्यप् भावे ॥ यजादेर्धातोः ॥ स्त्रियां भावे क्यप् प्रत्ययो भवति ॥ यज
भ्रज सन जनि षदि निपत मंनन मविदषु ॥ षुञ् शीङ् भृञ् इण् एतदपपारि
सपपरिचर अटाघ्यासा आसनु चर आगट हन एते यजादयः ॥ संप्रसारणं
इज्या ॥ स्त्रीत्यादाप् ॥ इज्या ॥ अजेगतौ हे ए च ॥ समज्या ॥ निषद्या ॥ ३१

मन्या ॥ नन्या ॥ विद्या ॥ सुत्या ॥ शिङ्नेया कृ चेवक्तव्यः ॥ शय्या ॥ भृत्या ॥ इत्या ॥
निपत्या ॥ न्यायोपकवावक्तव्यः ॥ इज्या ॥ समोऽर्गुणः ॥ परिचर्या ॥ परिचर्या ॥ अटा
या ॥ आस्या ॥ चर्या ॥ जागर्तेर्गुणः ॥ जागर्या ॥ हनस्तकारोऽन्तादेशः ॥ हत्या ॥ क्तिः ॥
धातोः क्ति प्रत्ययो भवति स्त्रियां भावे ॥ कृतिः ॥ बुद्धिः ॥ स्मृतिः ॥ धृतिः ॥ शमादी
नां दीर्घः ॥ शांतिः ॥ ह्वत्योर्नेट् गुणश्च ॥ ह्वादेः प्रत्ययस्य च इट् न गुणो न
भवेत् ॥ चकारात् प्रहादीनां इट् भवति ॥ शीङ् स्वप्ने ॥ संशीतिः ॥ दरो प्रहाम् ॥
निग्रहीतिः ॥ ऊच स्वप्रवचनकौटिल्यप्रतिष्टंभे विनेरवनेषु ॥ निऊचितिः ॥
स्विन्द प्रीतौ ॥ उपस्निहितिः ॥ स्नाम्लाज्यायुहाचरिभ्यः क्तेर्थे निः ॥ स्ना
निः ॥ म्लानिः ॥ ज्यानिः ॥ योनिः ॥ हानिः ॥ त्वरा संभ्रमे ॥ त्वरतेर्वस्यऊ

तंबाच्यं ॥ तर्णिः ॥ दृ १ चादिभ्यः क्तेर्निः ॥ अन्तस्यादेशः ॥ कीर्णिः ॥ लूनिः ॥ धूनिः
॥ संपदादेः क्विब्वा ॥ संपत् ॥ संपत्तिः ॥ कर्त्तरि क्तिर्भवसंज्ञायां ॥ प्रकृत इति
प्रकृतिः ॥ षिद्भिदादिभ्योऽङ् ॥ षितो धातोर्भिदादेश्च स्त्रियामङ् प्रत्ययो भवति ॥ प
चा ॥ मृजा ॥ ऋदृशोऽङि गुणः ॥ जृष् जृषु वयोहानौ ॥ जरा ॥ भिदा ॥ गुहः स्वरत्वे । क्षिपप
॥ गुहा ॥ मेधृ श्रद्धयवधमेधासंगमेषु ॥ मेधा ॥ लपः दोऽत्र वा कृपा नेष्णा ॥ कृपा ॥ पीडृ
अवगाहने ॥ पीडा ॥ गुरोर्हसात् ॥ गुरुमतो हसान्तात् स्त्रियामङ् प्रत्य
यो भवति ॥ न क्तिः ॥ ईहा ॥ ऊह वितर्के ॥ ऊहा ॥ ईडा ॥ क्तिरापादिभ्यः ॥ ३२
आप्तिः ॥ दीक्षितिः ॥ रा ईः प्रत्ययान्तात् ॥ प्रत्ययान्ताद्धातोरङ् प्रत्ययो

भवति स्त्रियां ॥ चिकीर्षा ॥ नोत्पूया ॥ घटाद्यं । कंडूया । पुत्रीया ॥ इकस्ति
पौ धातुनिर्देशे ॥ पच इत्यर्थे धातुपचिः ॥ पचतिः ॥ भवतिः ॥ ण्यंतात् श्र
थघट्टवंदिभ्युः स्त्रियां युर्वाच्यः ॥ कारणा ॥ अर्थ याचने ॥ अर्थना ॥ श्रंथ
ना ॥ श्रंथ संदर्भे ॥ श्रंथना ॥ वंदना ॥ घटना ॥ वेदना ॥ एषणा ॥ इञ् आज्ञा
दिभ्यः ॥ आजिः ॥ आतिः ॥ इक कृष्यादिभ्यः ॥ कृषिः ॥ गिरिः ॥ किरिः ॥
॥ इति स्त्र्यधिकारः ॥ ॥ पूर्वकाले क्त्वा ॥ धातोः क्त्वाप्रत्ययो भवति ॥ पूर्वकाले
समानकर्तृके धातौ प्रयुज्यमाने ॥ स्नात्वा सीत्वा स्नात्वा ॥ भुंक्ते ॥ अभो त्वी
त इति भुक्त्वा ॥ व्रजति ॥ न क्त्वा सेट् ॥ क्त्वा किद्भवति ॥ वर्त्तित्वा ॥ शयित्वा

मृडमृदगुधकुषक्लिशवदवसरुदविदमुषग्रहिभ्यः सेट्क्त्वा किद्वाच्यः॥
मृड सुखने॥ मृडित्वा॥ गुध रोषे॥ गुधित्वा॥ मृद क्षोदे॥ मृदित्वा॥ कुष
निष्कर्षे॥ कुषित्वा॥ क्लिश विबाधे॥ क्लिशित्वा॥ उदित्वा॥ विदित्वा॥ मुषि ।उषित्वा
त्वा॥ गृहीत्वा॥ नोपधात्थकारान्ताद्वा कित्॥ नकारोपधात् थकारान्ता
द्धातोः सेट् क्त्वा वा किद्भवति॥ नलोपः॥ ग्रथित्वा॥ ग्रंथित्वा॥ गुफित्वा॥ गुं
फित्वा॥ गुंफित्वा॥ अर्गरखव्वोः प्रतिधेत्वा जप्नुक्त्वा॥ खंज्त्वा॥ नव
कर्म॥ ऊदित्वा॥ क्त्वा वेट्॥ ऊदितो धातोः॥ परस्य क्त्वाप्रत्ययस्य वा इडागमो भ
वति॥ एषित्वा॥ इष्ट्वा॥ त्रमु॥ त्रमित्वा॥ त्रान्त्वा॥ अदोजघुः॥ जग्ध्वा॥ समा ३२

२

सल्यप्॥ समासेऽसति पूर्वकाले ल्यप् प्रत्ययो भवति नञ्पूर्वे धातौ प्रयुज्य
मानेऽसमर्थस्य करोति॥ प्रणम्य गच्छति॥ अनञ् इत्येके॥ अकृत्वा॥ ल्यपि लघुपू
र्वस्य रजेरयादेशो वाच्यः॥ परिणमय्य भुंक्ते॥ विगणय्य॥ अलघुपूर्वस्य
नसीभधार्य॥ आप्नोतेर्वा॥ आपय्य॥ प्राप्य॥ ल्यपि लाभावः॥ प्रदाय॥ प्रस्था
य॥ प्रसाय॥ विधाय॥ प्रहाय॥ तत्कालेऽपि ल्यप् दृश्यते॥ नेत्रे निमील्य
हसति॥ मुखं व्यादाय स्वपिति॥ पौनःपुन्येन प्रपदो द्वित्वं॥ समानकर्तृकेषु
धातुषु प्रयुज्यमानेषु पूर्वकाले पौनःपुन्ये धातोर्णमुल् प्रत्ययो भवति॥ स्म
र्तेर्न स्थपदस्य द्वित्वं॥ आतो युक्॥ पायंपायं गच्छति॥ भोजंभोजं व्रजति॥ स्मारं
स्मारं नमति॥ शिवम्॥ कथमादिषु स्वार्थे णमुल्॥ स च॥ कथंकारं अन्यथा

यतेषु प्रयुज्यमानेषु स्वार्थे त्तयो मूले प्रत्ययो भवति। कथंकारं॥ अन्यथाकारं॥
इत्थंकारं। एवंकारं॥ एवं प्रवनीत्यर्थः॥ समूलानत जीवेषु हन्तन्मूप्रहारा
मू वाच्यस्तेषामनुप्रयोगश्च॥ समूलघातं हन्ति॥ आत्तनूतकारं करोति॥ जीवं
याहं गृह्णाति॥ इत्यादि॥ वर्णात्कारः॥ वाचकात् शाब्दात्कार प्रत्ययो भवति स्वा
र्थे॥ अ इति अकारः॥ ककारः॥ रादिफो वा॥ रेफः॥ रकारः॥ लोकाच्छेषस्य
सिद्धिर्यथामातरादेः॥ स्वरूपाणां अनुभूत्यादि शिक्षां प्रभूधनसार्थकः॥ स
मस्कारी श्रुतौ भक्तो यां कृपीचक्रे रोचिताम्॥ आपाताद्रोहयत्नी वः कम
लाकर ईश्वरः॥१॥ सुरासुरनराकारमधुपापीतपंकजः॥ ॥इति श्रीम
त्परमहंसपरिव्राजकाचार्य अनुभूतिस्वरूपाचार्य विरचितायां मैध ३५

रिसमाख्यायां तृतीयवृत्तिसंपूर्णम्॥ ॥श्रीरस्तु॥ ॥शुभं॥

ते प्रत्यया भवंति। अलंकृत्। निराकृत्। प्रजन्। उत्पच्। उत्पत्। उदयस्। प्रसअहनो। उन्मद्। रु
चा। अप्। त्रप्। हन्। दधु। सह। चर। भृ। भ्राज्। अयंतएभ्यः इष्णु। जपंकरण। शी। सडी। स
लंकारिष्णुः। रोचन। शी। जोरे। चिल्लुः। मदिश्व भ्रेज। भोम दमो। देस्नु। तोच। उन्मदन्